**दिनाङ्कः-21.11.2023**

**प्रातः - 06:55**

## राजस्थान-तेलंगाना विधानसभा

तेलङ्गाना-राजस्थानयो: विधानसभानिर्वाचनं दृष्ट्वा सर्वाणि राजनैतिकदलानि निरन्तरं जनसभाः कुर्वन्ति। एतैः समागमैः सह तेलङ्गाना- राजस्थानयो: विधानसभानिर्वाचनस्य प्रचारः अपि पूर्णतया प्रचलति । अस्मिन् मासे त्रिंशत् दिनाङ्के तेलंगानाराज्ये मतदानं भविष्यति। सर्वेषां प्रमुखदलानां अभियानं तीव्रं कृतम् अस्ति। सर्वेषां दलानाम् प्रचलित-अभियानकर्तारः राज्ये मतदातॄन् लोभयितुं व्यस्ताः सन्ति। तथैव राजस्थानविधानसभानिर्वाचनार्थं सर्वेषां राजनैतिकदलानां प्रचलित-अभियानकर्तार: अद्य स्वपक्षस्य प्रत्याशिनां प्रचारार्थं व्यस्ताः सन्ति। एतेषु प्रचारविधिषु राजनैतिकदलानि निरन्तरं जनसभाः कुर्वन्ति। भाजपा-दलस्य-प्रमुख-नेता प्रधानमन्त्री च नरेन्द्रमोदी पालीनगरे विजयसंकल्पसभां सम्बोधयन् राज्यस्य जनान् सर्वोच्चप्राथमिकता दत्तं राजस्थाने एतादृशं सर्वकारम् आवश्यकम् इति अवदत्। सः अवदत् यत् राज्यस्य काङ्ग्रेस-सर्वकारः भ्रष्टाचार-परिवारवादं च तुष्टीकरणे च प्रवृत्तः अस्ति। अपरपक्षे काङ्ग्रेसदलस्य राष्ट्रियाध्यक्षः मल्लिकार्जुनखडगे श्रीगंगानगरे निर्वाचनसभां सम्बोधयन् केन्द्रप्रशासनस्य विविधविषयेषु आलोचनां कृतवान्। सः अवदत् यत् गहलोतसर्वकारेण प्रत्येकस्मिन् क्षेत्रे विकासः कृतः।

## द्वे-धन- द्वे

भारत-ऑस्ट्रेलिया-देशयोः मध्ये रणनीतिकविषयेषु चर्चाम् ह्य: नवदिल्लीनगरे द्वितीयं द्वे धन- द्वे सञ्जातम्। रक्षामन्त्री राजनाथसिंह: एवं विदेशमन्त्री डा. जयशंकरः ह्य: नवदिल्लीनगरे आस्ट्रेलियादेशस्य रक्षामन्त्री रिचर्ड मार्लेस्, विदेशमन्त्री पेनी वोङ्ग आभ्यां सह द्वितीयं भारत-ऑस्ट्रेलिया- द्वे धन-द्वे वार्ताम् कृतवन्तौ। समागमेस्मिन् सामरिक-रक्षा-सुरक्षा-सम्बद्धेषु विषयेषु व्यापकचर्चा अभवत्। भारत-ऑस्ट्रेलिया-व्यापक-रणनीतिक-विषयम् अग्रे सारयितुं द्विपक्षीय-क्षेत्रीय-वैश्विक-विषयकानि समाविष्टानि सन्ति। रक्षामन्त्री राजनाथसिंहस्य श्री रिचर्ड मार्लेस् इत्यनेन सह द्विपक्षीय: उपवेशनं सञ्जातम् अपि भविष्यति।

## उत्तराखण्ड/सिल्क्यारा सुरङ्ड

उत्तराखण्डस्य उत्तरकाशीनगरे निर्माणाधीनस्य सिल्क्यारासुरङ्गस्य अन्तः प्रबद्धानाम् एकचत्वारिंशत् श्रमिकाणां सुरक्षितरूपेण उद्धाराय युद्धस्तरे सहाय-उद्धार-कार्यक्रमाः निरन्तरं प्रचलन्ति। राष्ट्रीय राजमार्ग आधारभूत संरचना विकास निगम विभागस्य निदेशकेन मनीष खलको इत्यनेन उक्तं यत् नलिका माध्यमेन श्रमिकान् भोजनं, औषधि आदि अन्यसहाय्योपयोगी सामाग्रीन तत्र प्रदीयते।

## भारतान्तर्राष्ट्रीयचलच्चित्रमहोत्सवः

भारतान्तर्राष्ट्रीयचलच्चित्रमहोत्सवे भारतीयपैनोरमा इति अद्य गोवायां समारप्स्यते। अस्मिन् खण्डे पञ्चविंशतिः फीचर-चलच्चित्रं विंशतिः गैर-फीचर इति-चलच्चित्रं च प्रदर्शयिष्यते। भारतीयपैनोरमाखण्डस्य उद्घाटनं मलयालमचलच्चित्रेण आत्तम् इत्यनेन भविष्यति, यस्य निर्देशकः आनन्द एकरसाही इति अस्ति । मीना लॉन्गजम् इत्यनेन निर्देशितं 'एण्ड्रो ड्रीम्स्' इति वृत्तचित्रं नॉन-फीचर-चलच्चित्रखण्डे उद्घाटनचलच्चित्ररूपेण भविष्यति। भारतीयपैनोरमा इति विभागे प्रदर्शयिष्यमाणानां अन्येषु चलच्चित्रेषु विवेक अग्निहोत्री निर्देशितस्य हिन्दीचलच्चित्रस्य 'द वैक्सीन वार', ऋषभशेट्टी निर्देशितस्य कन्नडचलच्चित्रस्य कांतारा, कौशिकगांगुली निर्देशितस्य बङ्गलाचलच्चित्रस्य अर्धङ्गिनी समाविष्टानि च सन्ति।

## भारत- ऑस्ट्रेलिया

भारतीय क्रीडकः सूर्यकुमारयादवः आगामि विंशति विंशति श्रृङ्खला क्रीडया: दल निरीक्षकः भविष्यति, यस्याः आरम्भः नवम्बर्-मासस्य त्रयोविंशति दिनाङ्के विशाखापत्तनम्-नगरे भविष्यति।

**।। इति वार्ता:।।**